साहित्यम - तृतीय - पत्रम,

उपशास्त्री - रघुवंशमहाकाव्यम् (व्याख्या - खण्डः)

द्वितीय - खण्ड द्वितीय - सर्गः

DOMS Page No. Date / /

① → अथान्धकारं गिरिगह्वराणां दंष्ट्रामयूखैः शकलानि कुर्वन् ।
भूयः स भूतेश्वरपार्श्ववर्ती किञ्चिद् विहस्यार्थपतिं बभाषे ॥

व्याख्या → प्रस्तुतः श्लोकः महाकवि कालिदासरचित रघुवंश - महाकाव्यस्य द्वितीय सर्गात् समुद्धृतोऽस्ति । राज्ञो दिलीपस्य वचः संश्रुत्य सिंहः तं प्रति वदति ।

दिलीपं कथनान्तरं, भूतेश्वरपार्श्ववर्ती = शिवहरचरः सः = सिंह, गिरिगह्वराणां = पर्वतगुहाणाम्, अन्धकारं = ध्वान्तम्, दंष्ट्रामयूखैः = विशालदन्त किरणैः, शकलानि = खण्डानि, कुर्वन = सम्पादयन्, किञ्चित् = ईषत्, विहस्य = हास संविधाय, अर्थपति = नृपम्, भूयः = पुनः बभाषे = कथितवान् ।

② → उत्तिष्ठ वत्सेत्यमृतायमानं वचो निशम्योत्थितमुत्थितः सन् ।
ददर्श राजा जननीमिव स्वां गामग्रतः प्रस्रविणीं न सिंहम् ॥

व्याख्या → प्रस्तुतः श्लोकः महाकवि कालिदासरचित रघुवंश महाकाव्यस्य द्वितीय सर्गात् समुद्धृतोऽस्ति । राज्ञः दिलीपस्योपरि पुष्पवृष्टिकाले नन्दिनी दिलीपं प्रति अमृतमयी वाणी वदति ।

राजा = नृपः, अमृतायमानम् = अमृततुल्यम्, "वत्स ! = पुत्र ! उत्तिष्ठ = उत्थितो भव" इति = इत्याकारकः, उत्थितं = समुद्भूतम्, वचः = वचनम्, निशम्य = श्रुत्वा, उत्थितः = उपस्थितः, सन् = भवन् अग्रतः = अग्रे, प्रस्रविणीं = दुग्धदायिनीं, गां = नन्दिनीम्, स्वां = निजाम्, जननीमिव = माता मिव, न = नहि, ददर्श = अपश्यत्, सिंहं = सिंह, ददर्श = अपश्यत् । किन्तु तं = सिंह

हिन्दी = हे पुत्र! उठो इस तरह अमृततुल्य वचन को सुनकर उठते ही राजा दिलीप ने अपनी माता की तरह दूध बहाती हुई उस नन्दिनी को सामने देखा, सिंह को नहीं ।

Renu Devi
09/06/21

रा० उ० कान्त सं० महावि०
सुरवसेना, पूर्णिया
का० सिं० द० सं० वि०वि० दरभङ्गा

शास्त्री - I साहित्य

अभिज्ञानशाकुन्तलम् - पञ्चमाङ्क

प्र० (1) - पद्यमिदं व्याख्येयम् ।

अहिण्ण महुलोलुवो भवं तह परिचुम्बिअ चूअमंजरिं ।
कमलवसइ मेत्तणिव्वुदो महुअर विम्हरिओ सिणं कहं ॥

संस्कृत - अभिनवम् मधुलोलुपो भवांस्तथा परिचुम्ब्य चूत मञ्जरीम् ।
कमल वसति मात्र निर्वृतो मधुकर विस्मृतोऽस्येनां कथम् ॥

उत्तरम् → प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि कालिदास विरचितः अभिज्ञानशाकुन्तलस्य पञ्चमोऽङ्कात् उद्धृतोऽस्ति। अस्मिन् श्लोके हंसपदिकायाः गायनमस्ति। राजा दुष्यन्तः विदूषक साहाय्येन तुष्णीं भूत्वा तस्या गीतं शृणोति।

व्याख्या - हे मधुकरः ! भ्रमर (कामुक) अभिनवेन नूतनेन मधुना पुष्परसेन लोलुपः लुब्धः (सन्) तथा तेन प्रकारेण (यथानुभूतम्)। चूतस्य आम्रस्य मञ्जरीम्। परिचुम्ब्य - चुम्बिका कमलम् पद्मम् एवं वसतिः वासः सा एव कमलवसतिमात्रम् तेन निवृतः सुखितः एनाम् (मञ्जरीम्) कथं केन प्रकारेण विस्मृतः असि।

विशेषार्थः → हंसपदिका राज्ञी दुष्यन्तस्य आसीत्। राजा प्रेमं कृतवान् पुनः त्यज्य वसुमतिं परिणयं कृतवान् तदुपालम्भ स्वरूपं पदमस्ति। अपरिपक्वला वृत्तम्।

अप्रस्तुत प्रशंसा अलङ्कारः।

Renu Devi
09/06/21

राधा उमाकान्त सं० महावि० सुरक्सेना, पूर्णिया।

शास्त्री प्रथम रत्नावली नाटिका
शास्त्री द्वितीय-खण्ड प्रथमोऽङ्कः

DOMS Page No.
Date / /

(1) पादाग्रस्थितया मुहुः स्तनभरेणानीतया नम्रतां
शम्भोः सस्पृहलोचनत्रयपथं यान्त्या तदाराधने ।
ह्रीमत्या शिरसीहितः सपुलकस्वेदोद्गमोत्कम्पया
विश्लिष्यन्कुसुमाञ्जलिर्गिरिजया क्षिप्तोऽन्तरे पातु वः ॥

अन्वय – तदाराधने, मुहुः, पादाग्रस्थितया, स्तनभरेण, नम्रताम्, आनीतया, शम्भोः, सस्पृहलोचनत्रयपथम्, यान्त्या, सपुलकस्वेदोद्गमोत्कम्पया, ह्रीमत्या, गिरिजया, क्षिप्तः, शिरसि ईहितः, अन्तरे, विश्लिष्यन्, कुसुमाञ्जलिः, वः, पातु ।

प्रसङ्ग → प्रस्तुत श्लोकः महाकविश्रीहर्षदेवरचित रत्नावलीं नाटिकां समुद्धृतोऽस्ति । अस्मिन् श्लोके कविः निर्विघ्नतया तत्समाप्त्यर्थं मङ्गलाचरण नान्दीमुखमुपस्थापयति –

व्याख्या → तदाराधने – तस्य = शिवस्य, आराधने = अर्चने । मुहुः = वारम्वारम् । पादाग्रस्थितया – पादयोः = चरणयोः, अग्रे = अग्रभागौ ताभ्याम् स्थितया = अवस्थितया तथा विघ्नमुन्नतिं गच्छन्त्या इत्यर्थः । स्तनभरेण – स्तनयोः = कुचयोः भरः = भारः, तेन । नम्रताम् = अवनतिम् । आनीतया = प्रापितया । शम्भोः = शिवस्य, सस्पृहलोचनत्रयपथम् – स्पृहया सहितम् = सानुरागम्, लोचनानां त्रयम् – लोचनत्रयम्, सस्पृहञ्च तल्लोचनत्रयं सस्पृहलोचनत्रयम्, तस्य पन्थाः, तम् = सानुरागनयनत्रिमार्गम् । यान्त्या = गच्छन्त्या । सपुलकस्वेदोद्गमोत्कम्पया – पुलका = रोमाञ्चाः, स्वेदोद्गमः = घर्मविन्दुः उत्कम्पश्च = वेपथुश्च तैः सहितया (अतएव) ह्रीमत्या = लज्जितया गिरिजया = पार्वत्या । क्षिप्तः = प्रक्षिप्तः । शिरसि = मस्तके । ईहितः = इष्टः । अन्तरे = मध्ये । विश्लिष्यन् = विकीर्णतां गच्छन्, कुसुमाञ्जलिः = कुसुमानाम् = पुष्पाणाम् अञ्जलिः = पुष्पाञ्जलिः । वः = युष्मान् । (सामाजिकान्) पातु = रक्षतु । इति । अत्र काव्यलिंगमलंकारः । शार्दूलविक्रीडित वृत्तः ।

राधा उमाकान्त सं० महाविद्यालय सुखसेना (पूर्णियाँ) का० सिं० द० सं० विश्वविद्यालय दरभंगा
Renu Devi
09/08/21

साहित्यम-तृतीय-पत्रम
उपशास्त्री-प्रथम-खण्ड
व्याख्यायाः रघुवंशमहाकाव्यम्-द्वितीय-सर्गः

① आस्वादवद्भिः कवलैस्तृणानां कण्डूयनैर्दंशनिवारणैश्च ।
अव्याहतैः स्वैरगतैः स तस्याः सम्राट् समाराधनतत्परोऽभूत् ॥

प्रसंग → प्रस्तुतः श्लोकः महाकवि कालिदासरचित रघुवंश महाकाव्यात् समुद्धृतोऽस्ति । अस्मिन् श्लोके कविः दिलीप कर्तृ गोसेवा प्रकारं वर्णयति ।

व्याख्या → सम्राट् = चक्रवर्ती, स = राजा दिलीपः, आस्वादवद्भिः = रुचिकरैः, तृणानां = घासानाम्, कवलैः = ग्रासैः कण्डूयनैः = देहखर्जनैः, दंशनिवारणैः = मसकापसरणैः, अव्याहतैः = अप्रतिहतैः, स्वैरगतैः च = स्वच्छन्द गतिभिश्च, तस्याः = नन्दिन्याः, समाराधनतत्परः = सेवारतः, अभूत् = अभवत्

हिन्दी → राजा दिलीप कभी-कभी हरी-हरी घास से कभी-कभी खुजलाने से कभी-कभी मक्खी और मच्छड़ों से उड़ाने से इच्छानुसार उसे चलने से उसकी सेवा में तत्पर रहा करता था ।

② वशिष्ठधेनोरनुयायिनं तमावर्तमानं वनिता वनान्तात् ।
पपौ निमेषालसपक्ष्मपंक्तिरुपोषिताभ्यामिव लोचनाभ्याम् ॥

प्रसंग → प्रस्तुतः श्लोकः महाकवि कालिदासविरचितः रघुवंशम् महाकाव्यस्य द्वितीय सर्गात् समुद्धृतोऽस्ति ।

कवि सुदक्षिणायाः वनान्तात् आवर्तमानस्य राज्ञः दिलीपस्य दर्शनोत्सुकतां सूचयति ।

वशिष्ठधेनोः = नन्दिन्याः, अनुयायिनम् = अनुगच्छन्तम्, वनान्तात् = अरण्यप्रान्तात्, आवर्तमानम् = प्रत्यागतम्, तं = नृपम्, वनिता = सुदक्षिणा, निमेषालसा = एकाग्रदृष्टिः, पक्ष्मपंक्तिः = अपलकनयनरोमावलिः, उपोषिताभ्याम् = अङ्गीकृतोपवासाभ्याम्, इव = यथा, लोचनाभ्याम् = नयनाभ्याम्, पपौ = पीतवती ।

रा० उ० कान्त सं० महावि०
सुरखसेना, पूर्णिया

Renu Devi
09/06/21

का० सिं० द० सं० वि०वि० दरभं०